अभ्यास हेतु सेंपल प्रश्न–पत्र

माध्यमिक शिक्षा मण्डल

हायर सेकेण्डरी सत्र–2022–23

विषय – संस्कृत **XII**

समय – घण्टात्रयम् पूर्णाङ्काः – 80

**निर्देश** : (i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अड्.काः प्रदत्ताः।

प्रश्न 1.उचितविकल्पं चित्वा लिखत – 1X6=6

(i) 'त्रिविधम्' इत्यस्मिन् पदे समासः अस्ति।
(अ) तत्पुरुषः (ब) द्विगुः
(स) द्वन्द्वः (द) बहुब्रीहिः।

(ii) 'क्षणानन्तरम्' इत्यस्मिन् पदे समासविग्रहः अस्ति –
(अ) क्षणस्य अनन्तरम् (ब) क्षणेन अनन्तरम्
(स) क्षणात् अनन्तरम् (द) क्षणम् अनन्तरम्।

(iii) 'अज्ञानम्' इत्यस्मिन् पदे समासः अस्ति –
(अ) द्वितीया तत्पुरुष (ब) षष्ठी तत्पुरुष
(स) उपपद तत्पुरुष (द) नञ् तत्पुरुष।

(iV) 'शान्तो भव' इत्यस्मिन् पदे सन्धिः अस्ति –
(अ) दीर्घस्वर सन्धिः (ब) गुणस्वर सन्धिः
(स) विसर्ग सन्धिः (द) व्यञ्जन् सन्धि।

(V) 'गुणेनात्र' इत्यस्य पदे सन्धिः विच्छेदः अस्ति –
(अ) गुणेन + अत्र (ब) गुणेना + अत्र
(स) गुणे + नात्र (द) गुण + नात्र।

(Vi) 'प्रजानामेव' इत्यस्मिन् पदे सन्धिः अस्ति –
(अ) गुणस्वर सन्धिः (ब) यण्स्वर सन्धिः
(स) विसर्ग सन्धिः (द) व्यञ्जन् सन्धिः।

प्रश्न 2.प्रदत्त शब्दैः रिक्त स्थानपूर्तिं कुरुत – 1X7=7

(i) 'भवति' इत्यस्मिन् पदे ......धातु अस्ति। (भू/भव)

(ii) 'असि' इत्यस्मिन् पदे ....लकारः अस्ति। (लृट्लकारः/लट् लकारः)

(iii) इच्छामि' इत्यस्मिन् पदे ......पुरुषः अस्ति। (उत्तम पुरुषः/प्रथम पुरुषः)

(iv) 'अकरोत्' इत्यस्मिन् पदे .....वचनम् अस्ति। (एक वचनम्/बहुवचनम्)
(v) 'प्रयच्छामि' इत्यस्मिन् पदे ......उपसर्गः अस्ति। (प्रय/प्र)
(vi) 'प्रणम्य' इत्यस्मिन् पदे ......उपसर्गः अस्ति। (प्र/प्रण)
(vii) 'संहरति' इत्यस्मिन् पदे ......उपसर्गः अस्ति। (सम्/ति)

प्रश्न 3.उचित मेलनं कुरुत – 1X6=6

| | 'अ' | 'ब' |
|---|---|---|
| (i) | कुत्र | मा कुरुत |
| (ii) | अहम् | टाप् प्रत्यय |
| (iii) | वार्तालापं | मतुप् |
| (iv) | कोकिला | तुमुन् |
| (v) | गुणवान् | गच्छति |
| (vi) | नेतुम् | पठामि |

प्रश्न 4.एक पदेन उत्तरं लिखत – 1X7=7
(1) 'करी' पदस्य पर्यायपदं किम् अस्ति ?
(2) 'सुतः' पदस्य पर्यायपदं किम् अस्ति ?
(3) 'बुधाः' पदस्य विलोमपदं किम् अस्ति ?
(4) 'मौनम्' पदस्य विलोमपदं किम् अस्ति ?
(5) सत्यात् किं न कर्तव्यम् ?
(6) महीक्षिताम् आद्यः कः आसीत् ?
(7) शर्वरि केन भाति ?

प्रश्न 5.शुद्धवाक्यानां समक्षे 'आम' अशुद्ध वाक्यानां समक्षे 'न; इति लिखत– 1X6=6
(1) 'सर्वविद्यानिष्णातां पदे मदालसा विशेष्यं अस्ति।
(2) 'कपटी संन्यासिन्' पदे संन्यासिन् विशेषणं अस्ति ?
(3) 'राजेन्दुः दिलीपः' पदे दिलीपः विशेषणं अस्ति ?
(4) 'ज्योतिः शास्त्रपारङ्गतः ब्राह्मणः' पदे ब्राह्मणः विशेष्यं अस्ति।
(5) 'विना' पदे षष्ठी विभक्तिः भवति।
(6) संस्कृते षड् कारकाणि सन्ति।

प्रश्न 6.केन कुलं विभाति ? 2

अथवा

जगतः क्षयाय अल्पबुद्धयः प्रभवन्ति ?

प्रश्न 7.कस्याः रक्षार्थं पत्न्याः सहयोगः अनिवार्यः अस्ति ? 2

अथवा

भोजनान्ते किं विषम् ?

प्रश्न 8.वत्सराजः भोजं कुत्र नीतवान् ? 2

अथवा

रात्रौ के के प्रविशन्ति ?

प्रश्न 9.शिवगणाः कीदृशाः आसन् ? 2

अथवा

लक्ष्मणेन किं कर्तुं निश्चयः कृतः ?

प्रश्न 10.काभ्यां न प्रमदितव्यम् ? 2

अथवा

दिलीपस्य कार्याणाम् आरम्भः कीदृशः आसीत् ?

प्रश्न 11.प्रश्न पत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितं श्लोकं लिखत। 2

प्रश्न 12.रेखाङ्किंतपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वौ) 2

(1) भूतेषु दया एव दैवी सम्पद्।

(2) मदालसा शिष्यान् जीवनकलां पाठयितुम् इच्छति ?

(3) पार्थिवस्य वनगमननिवृत्तिः भविष्यति।

प्रश्न 13.अधोलिखितसंवादे कः कं प्रति कथयति इति लिखत– 2

एक शरीर संक्षिप्ता पृथिवी रक्षितव्या।

अथवा

त्वं तु केवलं विद्याध्ययने एव रता।

प्रश्न 14.रामायणस्य रचनाकारः कः ? अस्मिन् काव्ये कति काण्डानि सन्ति ? 2

अथवा

'कुमारसम्भवम्' महाकाव्यस्य रचनाकारः कः ? अस्मिन् महाकाव्ये कति सर्गाः सन्ति ?

प्रश्न 15.संस्कृतनाट्यशास्त्रस्य जनकः कः अस्ति ? 2

अथवा

एकस्य चम्पूकाव्यकारस्य नाम लिखत। तस्य रचनाश्च लिखत।

प्रश्न 16.अधोलिखितं गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृत भाषायां लिखत – 3

यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। याान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। अथ यदि ते कर्म वि चिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ताः आयुक्ताः, अलूक्षाः धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः।

(1) अस्माकं कानि उपास्यानि ?

(2) आचार्यस्य कीदृशानि कर्माणि सेवितव्यानि ?

(3) ब्राह्मणाः कीदृशः स्युः ?

अथवा

भोजविषयिणाम् इमां भविष्यवाणीं निशम्य मुञ्जो विच्छायवदनाऽभूत्। ततो राजा ब्राह्मणं संप्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत्–यदि राजलक्ष्मीः भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः। ततश्च अभूक्त एव सः एकाकी किमपि चिन्तयित्वा बङ्गदेशाधीश्वरं वत्सराजं समाकारितवान्।

(1) कः विच्छायवदनोऽभूतः ?
(2) मुञ्जः कं समाकारितवान् ?
(3) राजलक्ष्मीः कुत्र गमिष्यति ?

प्रश्न 17.अधोलिखितं गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत – 3

असौ मयाहतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।

(1) कः मया हतः?
(2) ईश्वरः कः अस्ति ?
(3) अहं कान् शत्रुः हनिष्ये ?

अथवा

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्त्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।

(1) केषां भूत्यर्थं सः बलिमग्रहीत ?
(2) दिलीपः प्रजानां भूत्यर्थं कम् अग्रहीत् ?
(3) रविः रसं किमर्थम् आदत्ते ?

प्रश्न 18.अधोलिखित नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत– 3

कुण्डला – मदालसे तूष्णीं किमर्थं तिष्ठसि ? देहि प्रत्युत्तरम्।
ऋतध्वजः–एकस्य अपराधेन सर्वा जातिः दण्डया इति विचित्रो न्यायः तव सख्याः।
ऋतध्वजः–माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा।
नारी एव समस्तसृष्टेः निर्मात्री। परं कथनेन किम् ?
परीक्ष्य एव ज्ञास्यति अत्रभवती। परीक्षार्थमुद्यतोऽस्मि गृहास्थाश्रम–प्रयोगशालायाम्।

(1) का समस्तसृष्टेः निर्मात्री ?
(2) ऋतध्वजस्य नारीं प्रति का धारणा आसीत् ?
(3) 'मदालसे तूष्णीं किमर्थं तिष्ठसि ? इति का कथयति ?

अथवा

लक्ष्मणः– न शक्नोमि रोषं धारयितुम्। भवतु भवतु। गच्छामस्तावत्। (प्रस्थितः)
रामः – त्रैलोक्यं दग्धुकमेव ललाटपुटसंस्थिता। भृकुटिर्लक्ष्मणस्यैषा नियतीव व्यवस्थिता।।
सुमित्रामातः ! इतस्तावत्।

(1) कः न शक्नोमिरोषं धारयितुम् ?
(2) लक्ष्मणस्य भृकुटिः कीदृशः आसीत् ?
(3) 'भवतु' इत्यस्मिन् पदे कः लकारः अस्ति ?

प्रश्न 19.संकेताधारितं रिक्तस्थानपूर्तिं कुरुत (कोऽपि त्रयः) – 3

(वद्, अन्तेवासिनम्, संन्यासी, यूनोः)

(1) ............तुरीयाश्रमसेवी अस्ति।

(2) ............हृदयं उद्यानस्य शोभां दृष्ट्वा उत्कण्ठितं भवति।

(3) वेदमनूच्याचार्यो ....................अनुशास्ति।

(4) सत्यं .........धर्मं चर।

प्रश्न 20.अपठितं गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत – 4

(कोऽपि, चत्वारः)

संसारे जनाः सुखम् इच्छन्ति। सुखं च धनेन एव प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति। यस्य पार्श्वे धनं भवति सः सुखेन शेते। निर्धनं पुरुषं तु मित्राणि अपि त्यजन्ति। चौर्येण, कपटेन च प्राप्तं धनं विनाशकरं भवति। कृषि कर्मणा, व्यापारेण, परिश्रमेण च प्राप्तं धनं फलानि। यद् धनं फलति तेनैव सुखं प्राप्यते। धनहीनोऽपि सुखी भवति। सुखं तु मनसा अनुभूयते। यत्र संतोषः, तत्रैव वस्तुतः सुखम्।

(1) कुत्र जनाः सुखम् इच्छन्ति ?

(2) सुखं कथं प्राप्तुं शक्यते ?

(3) निर्धनं पुरुषं कानि अपि त्यजन्ति ?

(4) केन प्राप्तं धनं विनाशकरः भवति ?

(5) कः सुखी भवति ?

(6) केन प्राप्त धनं फलानि ?

प्रश्न 21. स्वप्राचार्यस्य कृते दिनत्रयस्य अवकाशार्थं प्रार्थनापत्रं लिखत। 4

अथवा

पुस्तक–प्रेषणार्थं प्रकाशकं प्रति पत्रं लिखत।

प्रश्न 22.प्रदत्तैः शब्दैः अनुच्छेद लेखनं कुरुत – 4

(नोद्घाटयेत्, लोभश्च, आत्मनः, वर्णयन्, श्रीकृष्णः, बोधयति, त्रीणि, पिहितानि)

कर्तव्याकर्तव्यं ..........भगवान्...........अर्जुनस्य माध्यमेन अस्मान् सर्वान्.......यत् कामः क्रोधः. ........एतानि त्रीणि नरकस्य द्वाररुपाणि अतः यः जनः ..........नाशं नेच्छति अपितु वकीयं कल्याणमिच्छति सः एतानि द्वारणि.............सर्वप्रत्यनैः च एतेषां त्रयाणां त्यागं कुर्यात् येनैतानि.............द्वारणि सदैव तस्य कृते.........तिष्ठेयुः सः च उन्नतिपथि अग्रसरो भवेत्।

अथवा

(बहुधा, प्रचलितः, त्वां, दुर्गाध्यक्षः, गूढचरं, यथोचितं, संन्यासी, नाहं)

अहं तु........कस्यापि, देशद्रोहिणो............मन्ये। तदागच्छ..........समीपे स वाभिज्ञाय, त्वया ..........व्यवहरिष्यति। ततः..........तु त्यज ।.........पुनरायास्यामि, नाहं पुनरेव कथयिष्यामि, महाशयोऽसि दयस्व इति.........अकथयत्, दौवारिकस्तु तमाकृष्य नयन्नेव............ ।

प्रश्न 23.अधोलिखितं एकं विषयं चित्वा कवि परिचयं लिखत –                    4

(i) कालिदासः
(ii) जयदेवः
(iii) भारविः
(iv) वाल्मीकिः

———0———